दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
▪ पृष्ठ-4 ▪ वर्ष-3 ▪ अङ्क-211
1
23.05.2024 गुरुवासरः वि.सं. २०८० बैशाखशुक्लपूर्णिमा ज्येष्ठ 10 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## प्रधानमन्त्री मोदी बृहत्तम-खाद्य-वितरक-तन्त्रांशस्य संस्थापकः दीपिन्दर-गोयलः इत्यस्य प्रशंसाम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी भारतस्य एकस्य बृहत्तम-खाद्य-वितरक-तन्त्रांशस्य संस्थापकः दीपिन्दर-गोयलः इत्यस्य प्रशंसाम् अकरोत्। श्री गोयलस्य सार्वजनिक-संदेश-पटले एकं सन्देशं प्रसारयन् प्रधानमन्त्री अवदत् यत् परिश्रमः महतीं ऊर्ध्वतां प्रति नेतुं शक्नोति । सः अवदत् यत् श्री गोयलस्य जीवनयात्रा असंख्य-युवकान् उद्यमशीलतायाः स्वप्नं साकारं कर्तुं प्रेरयति। सः अवदत् यत् स्टार्टअप-संस्थानां समृद्ध्यर्थं अनुकूलं वातावरणं प्रदातुं सर्वकारः प्रतिबद्धः अस्ति

## सर्वोच्चन्यायालयः धनशोधन-प्रकरणे नियमित-अस्थायी-विमोचन-याचिका प्रख्यापनम् अधिकृत्य तथ्यानां निगूढने आपत्तिं प्रकटितवान्



सर्वोच्चन्यायालयेन धनशोधन-प्रकरणे नियमित-अस्थायी-विमोचन-याचिका-प्रख्यापनम् अधिकृत्य तथ्यानां निगूढने आपत्तिः प्रकटितः अनन्तरं हेमन्तसोरेनः इत्यनेन प्रवर्तननिदेशालयस्य निगडनं विरुध्य प्रख्यापिता याचना प्रत्यावर्तिता

## उपराष्ट्रपतिः जगदीपधनखड़ः तेहरानयात्रायां तेहरानं प्राप्तवान्



उपराष्ट्रपतिनः जगदीप-धनखडस्य तेह्रान-नगरे ईरानी-अधिकारिभिः स्वागतं कृतम् । धनखर-महोदयः ईरानी-राष्ट्रपतिः सेय्यद इब्राहिम-रायसी, विदेशमन्त्री एच. अमीर-अब्दुल्लाहियन च इत्यनयोः निधने शोकं प्रकटितुम् आधिकारिक-समारोहे भागं भजिष्यति।

## लोकसभानिर्वाचनम् - लोकसभानिर्वाचनस्य षष्ठ-सप्त-चरणयोः प्रचाराभियानं द्रुतगत्या प्रवर्तते

हिमसंस्कृतवार्ताः नवदेहली

लोकसभानिर्वाचनस्य षष्ठ-सप्त-चरणयोः प्रचाराभियानं द्रुतगत्या प्रवर्तते। उत्तरप्रदेशे विभिन्नदलानां प्रचारकाः प्रचाराभियाने रताः सन्ति। प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य बस्ती-जनपदे एकं राजनीतिक-जनसभां समबोधयत् । प्रधानमन्त्री प्रोक्तवान् यत् भाजपा-दलेन पञ्च-निर्वाचनचरणेषु एव बहुमतं समर्जितम् । उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः जौनपुर-बस्ती-जनपदयोः प्रचारं कृतवान् । सः सुल्तानपुर, सिद्धार्थनगर, बलरामपुर जनपदेषु अपि जनसभाः सम्बोधयिष्यति । लोकसभानिर्वाचनस्य सप्तमे चरणे अष्टराज्याणां केन्द्रशासितप्रदेशानां च चतुरधिक-नवशतं प्रत्याशिनः निर्वाचनद्वन्द्वे भागं भजिष्यन्ति ।



निर्वाचन आयोगः प्रोक्तवान् यत् सप्त-पञ्चाशत्-लोकसभा-निर्वाचनासनेषु पञ्चोत्तरैकशताधिक-द्विसहस्र प्रत्याशिनः नामाङ्कनं कृतवन्तः । अन्वीक्षणानन्तरं चतुरधिक-नवशतं नामाङ्कनपत्राणि वैधानि प्राप्तानि । सप्तमचरणाय जूनस्य प्रथमदिनाङ्के मतदानं भविष्यति । पञ्जाबे सर्वाधिकानि अष्टनवत्युत्तर-पञ्चशतानि नामाङ्कनपत्राणि प्राप्तानि । इतः परं उत्तरप्रदेशस्य त्रयोदश-निर्वाचनासनेषु पञ्चनवत्युत्तर-पञ्चशतं नामाङ्कनपत्राणि प्राप्तानि । निर्वाचनस्य अस्मिन् अन्तिमचरणे उत्तर-प्रदेशपञ्जाबयोः त्रयोदश-त्रयोदश, पश्चिमबङ्गालस्य नव, बिहारस्य अष्ट, ओडिशायाः षट्, हिमाचलस्य चत्वारि, झारखण्डस्य त्रीणि, केन्द्रशासित-प्रदेशस्य चण्डीगढस्य एकं च निर्वाचनासनेषु मतदानं भविष्यति । मतगणना जूनमासस्य चतुर्थदिनाङ्के भविष्यति ।

## निर्वाचनायोगः- प्रमुखप्रचारकाः एतादृशं वक्तव्यं न दद्युः येन आदर्श-आचार संहितायाः उल्लङ्घनं स्यात् निर्वाचनायोगेन निर्देशः प्रदत्तः

हिमसंस्कृतवार्ता - नवदेहली।

निर्वाचनायोगेन भारतीय जनता पार्टीति दलस्य अध्यक्षः जे.पी. नड्डा इत्यस्मै, कांग्रेस्-अध्यक्षः मल्लिकार्जुन- खरगे इत्यस्मै च निर्देशः प्रदत्तः यत् तौ दलस्य प्रमुख-प्रचारकेभ्यः एकां सञ्चेतनां प्रकाशयेत् यत् ते एतादृशं वक्तव्यं न दद्युः येन आदर्श-आचार संहितायाः उल्लङ्घनं स्यात् । द्वाभ्याम् अध्यक्षाभ्यां प्रेषिते पत्रे, आयोगः प्रोक्तवान् यत् किमपि दलं केऽपि प्रत्याशिनः च एतादृशं भाषणं दद्यात् येन समाजे मतभेदं जायेत् सांप्रदायिकता च प्रवर्धेत्।




## भारतीयऋतुविज्ञानविभागेन भारतस्य उत्तरभूतल-क्षेत्रेषु मध्यभारते च ताप-तरङ्गानां, कारणेन पञ्चविंशति दिनाङ्क यावत् रक्तसञ्चेतना प्रसारिता

हिमसंस्कृतवार्ता - नवदेहली।

भारतीयऋतुविज्ञानविभागेन भारतस्य उत्तरभूतलक्षेत्रेषु मध्यभारते च ताप-तरङ्गानां कारणेन आगामि- पञ्चदिनानि यावत् रेड-अलर्ट इति सञ्चेतना प्रसारिता। पञ्जाब, हरियाणा, चण्डीगढ, दिल्ली, उत्तरप्रदेश, राजस्थान, मध्यप्रदेश, केरल चेत्यादिषु राज्येषु अस्य मासस्य पञ्चविंशति-दिनाङ्कपर्यन्तं तीव्र-ताप-तरङ्गस्य स्थितिः निरन्तरं भविष्यति इति भारतीय-ऋतुविज्ञान-विभागेन पूर्वानुमानं कृतम् अस्ति। भारतीय-ऋतुविज्ञान- विभागेन इदमपि अनुमानं प्रकटितं यत् शनिवासरं यावत् अधिकतमं तापमानं चतुश्चत्वारिंशत्-तः षड्चत्वारिंशत् डिग्री सेल्सियस् पर्यन्तं भविष्यति । ऋतु-विज्ञानविभागः प्रोक्तवान् यत् आगामि-



दिवसत्रयेषु दक्षिण-भारते तीव्रवृष्टेः सम्भावना अस्ति । उत्तर-पूर्व-अरब-सागर-मालदीव-कन्याकुमारी-द्वीप-समूह-क्षेत्रेषु दक्षिण-पश्चिम-मानसून-कारणेन आगामि-दिवसयोः केषुचित्-क्षेत्रेषु वर्षायै अनुकूल-वातावरणं सज्जातम् । ऋतुविज्ञानविभागः प्रोक्तवान् यत् तमिलनाडु, पुदुचेरी, कराइकल, केरल, माहे, कर्नाटक-क्षेत्रयोः आगामि-दिवसत्रयेषु तीव्रवृष्टेः सम्भावना अस्ति ।

## पाकिस्तानाधिकृत-कश्मीरः भारतेन सह अस्ति, भारतेन सह भविष्यति, भारतं पुनरेतं स्वस्वामित्वम् आनेष्यति- अमितशाहः



पश्चिम बंगालस्य घातलक्षेत्रे अद्य जनसभां सम्बोधयन् भारतीयजनतापार्टीति दलस्य वरिष्ठनेता केन्द्रियमन्त्री च, अमितशाहः प्रोक्तवान् यत् पाकिस्तानाधिकृत-कश्मीरः भारतेन सह अस्ति, भारतेन सह भविष्यति, भारतं पुनरेतं स्वस्वामित्वम् आनेष्यति च । श्रीशाहः प्रोक्तवान् यत् पश्चिम बंगालस्य तृणमूल-सर्वकारेण जनाः विकासवञ्चिताः कृताः सन्ति। सः प्रोक्तवान् यत् संदेशखालीक्षेत्रस्य घटनया महिलानाम् आत्मसम्मानं घातितम् अस्ति । इतः पूर्वं श्रीशाहेन कांथीक्षेत्रे जनसभा कृता आसीत्। सः पुरुलिया-बांकुरा-लोकसभा-क्षेत्रयोः द्वे जनसभे सम्बोधयिष्यतः ।




## सुभाषितम्

विरला जानन्ति गुणान्
विरलाः कुर्वन्ति निर्धने स्नेहम्।
विरलाः परकार्यरताः
परदुःखेनापि दुःखिता विरलाः।।


भावार्थः- दूसरों के गुण पहचानने वाले थोड़े ही हैं। निर्धन से नाता रखने वाले भी थोड़े हैं। दूसरों के काम में मग्न होने वाले थोड़े हैं तथा दूसरों का दुःख देखकर दुःखी होने वाले भी थोड़े हैं।

✍ प्रतीकसाठ्ये मुम्बई

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# 'शुक्कर-पुङ्ग-उपनद्योः वज्रचूर्णकस्थापनं कृत्वा खननतस्करैः खनिजसम्पदा चोरिता'- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ता- बिलासपुरम्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् पूर्वभाजपासर्वकारे राज्ये सार्वजनिकसम्पत्त्याः लुण्ठनम् अभवत्। बृहत् तस्कराः सज्जाः भूत्वा शुक्कर- पुङ्ग- उपनद्योः वज्रचूर्णकस्थापनं कृत्वा सम्पूर्णं खनिजसम्पदां हरन्ति स्म। एतादृशाः बहवः जनाः परोपकारिणः भवन्ति, परन्तु भ्रष्टाचारद्वारा धनम् अर्जयितुं व्यस्ताः भवन्ति। एतादृशानां भ्रष्टजनानाम् उपरि पाशं कठिनं कृत्वा सर्वकारेण एकस्मिन् वर्षे २२०० कोटिरूप्यकाणां अतिरिक्तं राजस्वं प्राप्तम्। किं वयं न जानीमः यत् भाजपा काङ्ग्रेससर्वकारस्य पतनस्य षड्यंत्रं कुर्वन् अस्ति, मुख्यः शिल्पकारः जयरामठाकुरः आसीत्। षट् काङ्ग्रेसविधायकाः त्रयः निर्दलीयाः च भाजपायै विक्रीताः। इन्द्रदत्तलखनपालः अस्माभिः सह प्रातःभोजने स्वच्छं रसं पिबति स्म, मया मन्यते यत् सर्वं सुष्ठु अस्ति, प्रथमं मतदानं कर्तव्यम् इति वदन् बड्सरविधायकः प्रस्थितवान्, सर्वेषु दृष्टिः स्थापयिष्यामि इति। परन्तु, सः पूर्वमेव विक्रीतवान् आसीत्, तस्य नाम अधुना इन्द्रदत्तविक्रीतः अभवत्। दलस्य विरोधः अस्ति, अस्माकम् अपि आसीत्, परन्तु कदापि न विक्रीतम्। दलस्य मध्ये स्थित्वा युद्धं कृतवान्।

मुख्यमंत्री सुखविन्दरसिंहसुक्खुः लोकसभाप्रत्याशिनः सतपालरायजादा इत्यस्य समर्थने बिलासपुरे, घुमरवीं विधानसभानिर्वाचनक्षेत्रस्य बद्धाघाटे, भराड़्यां, झंडूत्ता विधानसभाक्षेत्रस्य च निर्वाचनजनसभासु एतद् उक्तवान्। सः अवदत् यत् यदा सः राज्ये सत्तां स्वीकृतवान् तदा कोषे एकसप्ताहस्य अपि व्ययस्य पूर्तये धनं नासीत्। आगामिमासस्य वेतनं कर्मचारिभ्यः दातुं न शक्ष्यन्ति इति अधिकारिणः अवदन्। अहं अवदम् यत् वेतनं दत्तं भविष्यति तथा च सर्वकारः अपि चालयिष्यते, भ्रष्टाचारस्य पृष्ठद्वाराणि पिधायितव्यानि भविष्यन्ति।

मुख्यमन्त्री उक्तवान् यत् जूनमासस्य चतुर्थे दिने एकः अपि विक्रयणयोग्यः पूर्वविधायकः विजयी न भविष्यति। तेषां स्थितिः दुर्गता भविष्यति, जनसमूहेन तान् स्वगृहं प्रेषयितुं निर्णयः कृतः। भाजपायाः कोऽपि निष्ठावान् कार्यकर्ता विक्रीतविधायकेभ्यः मतदानं न करिष्यति, यतः ते भाजपायाः कृते आवश्यकाः न सन्ति, ते बाध्यताः एव। भाजपाराष्ट्रियाध्यक्षः जेपीनड्डावर्यस्य बाध्यतायाः कारणात् तं दलस्य समावेशं कृतवान् अस्ति। जयरामठाकुरः वदति यत् जूनमासस्य चतुर्थे दिने द्वौ सर्वकारौ निर्मितौ भविष्यतः, एकः हिमाचले अपरः दिल्लीनगरे, परन्तु विपक्षस्य नेतुः गणितस्य अङ्काः न्यूनाः भविष्यन्ति। ते न जानन्ति यत् उभयत्र भाजपा- सर्वकाराः न निर्मीयन्ते। हिमाचले काङ्ग्रेससर्वकाराय कोऽपि संकटः नास्ति। सर्वकारस्य निरपेक्षबहुमतम् अस्ति, अतः एव तस्य विधायकौ मण्डी- शिमला- संसदीयक्षेत्रेभ्यः निर्वाचनं कुर्वतः सन्ति। सः अवदत् यत् न्यायालये अटन्तः नियुक्तयः वैधानिकक्लेशात् बहिः कृत्वा नियुक्तिपत्राणि दातुं सर्वकारेण आरब्धा। सर्वकारीयविभागेषु ४००००० रिक्तस्थानानि सन्ति। अस्माकं सर्वकारेण एकस्मिन् वर्षे २२ सहस्रनियुक्तयः कृताः। हिमाचलस्य पूर्वस्य डबलइञ्जिनसर्वकारेण सर्वकारीयकोषस्य रिक्तीकरणेन सह ५ वर्षेषु केवलं २० सहस्र एव नियुक्तयः कृताः। अस्माकं सर्वकारः केवलं मतार्थं राजनीतिं न करोति। अधिकारिणः अवदन् यत् २०२६ तमे वर्षे कर्मचारिभ्यः पुरातनवृत्तिः दातव्यं येन ते २०२७ तमस्य वर्षस्य निर्वाचने लाभं प्राप्तुं शक्नुवन्ति। परन्तु प्रथमे एव मन्त्रिमण्डले अहं ओपीएस दत्तवान्। अधुना अन्येषु बोर्डेषु निगमेषु च वृत्तिं दातुं सर्वकारः विचारयिष्यति।

# हिमाचले आदर्श आचारसंहितायाः कार्यान्वयनात् अधुना यावत् १४०६ उपालम्भाः प्राप्ताः- मुख्यनिर्वाचनाधिकारी




**हिमसंस्कृतवार्ता- शिमला।** मुख्यनिर्वाचनाधिकारी मनीषगर्गः अवदत् यत् आदर्श- आचारसंहितायाः कार्यान्वयनानन्तरम् अद्यावधि प्राप्तानां १४०६ उपालम्भानां मध्ये १२३५ उपालम्भानां निस्तारणं कृतम्। सः अवदत् यत् राज्यसम्पर्ककेन्द्रे टोल फ्री संख्यायां ७७८ उपालम्भाः प्राप्ताः। तस्मिन् एव काले जिलासंपर्ककेन्द्रद्वारा १९५० आक्षेपाः पञ्जीकृताः, येषु ६९१ आक्षेपाः प्राथमिकतारूपेण निराकृताः। तदतिरिक्तं राज्य- जिला- एमसीसी-नोडल- अधिकारिणां माध्यमेन ३४९ उपलम्भाः प्राप्ताः, येषु २६६ उपालम्भाः निराकृताः सन्ति। सी-विजिल एप मार्गेण प्राप्तानां २७९ उपालम्भानाम् अन्वेषणं कृत्वा समयसीमायाः अन्तः निर्णयः कृतः, उल्लङ्घनस्य सन्दर्भे आवश्यकाः कार्यविधयः च कृता। एतावता प्राप्तानां उपालम्भानां ८८ प्रतिशतं निराकरणं जातम् इति सः अवदत्।

मण्डीसंसदीयक्षेत्रस्य भाजपाप्रत्याशिनः सभायां काजायां बाधाम् उत्पादयितुं कांग्रेसकार्यकर्तृणां विरुद्धं प्राथमिकी पञ्जीकृता अस्ति। सः अवदत् यत् अन्वेषणप्रक्रिया प्रचलति, काङ्ग्रेसकार्यकर्तृणां विरुद्धं निर्वाचनाधिकारिणा एवम् उपविभागीयाधिकारिणा च सूचनाः निर्गताः। मनीषगर्गः अवदत् यत् हमीरपुरकाङ्ग्रेसयुथक्लबस्य उपयोक्तृणां कङ्गनारानौतायाः विरुद्धं आभासीयपटले आपत्तिजनकसामग्रीं पोस्ट-करणस्य विषये भाजपाद्वारा कृतस्य उपालम्भस्य विषये अन्वेषणस्य विस्तृत- प्रतिवेदनसहितं एषः विषयः भारतस्य निर्वाचन- आयोगाय प्रेषितः।

# विद्यालयप्रबन्धनसमित्या बिजन-ढलवान विद्यालयाय विद्युत्व्यजनानि दत्तानि



**हिमसंस्कृतवार्ता- लघ्वीकाशी मण्डी।** राजकीय-उच्च-विद्यालयः बिजन-ढलवान शिक्षाखण्ड सदर-१ जिला मण्डी इत्यस्य विद्यालयप्रबन्धनसमित्या (SMC) बुधवासरे भीषणतापेन छात्रेभ्यः आश्रयं दातुं त्रीणि विद्युत्व्यजनानि दत्तानि यस्य उपयोगः छात्राणां कक्षाकक्षेषु भविष्यति। अस्य उदात्तकार्यस्य कृते विद्यालयस्य बिजन-ढलवानस्य मुख्याध्यापिका मोनिका ठाकुर इत्यनया विद्यालय-प्रबन्धन-समितिं प्रति आभारं प्रकटितम्। मुख्याध्यापिका अवदत् यत् विद्यालयस्य प्रबन्धनसमितिः (एस.एम.सी.) छात्रकल्याणार्थं सहकार्यं कुर्वन् अस्ति। अस्य विद्यालयस्य उन्नयनं २०१७ तमे वर्षे अभवत्। परन्तु अधुना यावत् केवलं कक्षद्वये एव कक्षाः प्रचलन्ति। यस्मात् कारणात् कक्षाणां अभावात् छात्राणां अध्ययने बाधा अभवत्। एसएमसी इत्यनेन सहकार्यं कृत्वा द्वौ कुटीरौ (शेड) सज्जीकृतौ येन छात्राणां कृते कक्षाः उपलभ्यन्ते। संस्कृतशिक्षकः विद्यालयस्य एस. एम. सी. प्रभारी च डॉ. मनोजशैलः अवदत् यत् अस्मिन् विद्यालये एस. एम. सी., शिक्षकाणां समन्वयः अतीव उत्तमः अस्ति। विद्यालयप्रबन्धनसमित्या सह विद्यालयस्य शिक्षकाः छात्राणां हिताय विद्यालयस्य च सृजनात्मककार्यक्रमेषु आर्थिकरूपेण समये समये सहकार्यं कुर्वन्ति।

# हास्यकलाकारेण सह कङ्गनायाः तुलनां कृतवान् विक्रमादित्यः



**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य उष्णतमम् आसनं मन्यमानस्य मण्डीसंसदीयक्षेत्रस्य विषये भारतीयजनतापक्षस्य प्रत्याशिनः चलचित्रस्य अभिनेत्री च कङ्गनारानौतायाः काङ्ग्रेसस्य प्रत्याशिनः विक्रमादित्यसिंहस्य च मध्ये भवति शब्दयुद्धं स्थगितुं किमपि लक्षणं न दृश्यते। उभौ परस्परं व्यक्तिगतजीवने टिप्पणीं कर्तुं न लज्जतः। बुधवासरे राज्यस्य मन्त्री विक्रमादित्यसिंहः कङ्गनारणौतायाः तुलनां हास्यकलाकारेन सह अकरोत्। सः अवदत् यत् कङ्गना यत् प्रकारस्य वक्तव्यं ददाति तस्मात् इदं प्रतीयते यत् कङ्गना बॉलीवुडस्य प्रसिद्धं हास्यकलाकारं कपिलशर्मा अपि निष्कासयितुं शक्नोति। विक्रमादित्यसिंहः अवदत् यत् कङ्गना कपिलशर्मा इत्यस्मै स्पर्धां ददाति। हिमाचले तस्य मनोरञ्जनसमयः समाप्तः। अधुना सः पुनः मुम्बईनगरं गत्वा स्वस्य अवशिष्टानि चलच्चित्राणि सम्पूर्णं कुर्यात् अथवा स्वस्य नूतनं शो 'Comedy Show with Kangana' इति आरभेत्। हिमाचले तस्याः समयः जूनमासस्य ४ दिनाङ्के समाप्तः भविष्यति। मण्डीतः काङ्ग्रेसस्य प्रत्याशी विक्रमादित्यसिंहः अवदत् यत्, "कप्तानः विक्रमबत्रा वा सौरभ कालिया वा, यथा हिमाचलस्य कृते तेषां प्राणानां बलिदानं कृतम्। अधुना सः समयः आगतः यदा सेनायां राज्यस्य पृथक् प्रतिनिधित्वं भवेत्। भारतीयसेनायां हिमाचलप्रदेशात् एकः रेजिमेण्टः भवेत् इति लोकसभायां गम्भीरतापूर्वकं एषः विषयः उत्थापितः भविष्यति। अहं जानामि यत् रक्षायां राज्यानां प्राधान्यं न दीयते। "प्राणत्यागं कृतवन्तः जनाः यथायोग्यं सम्मानं दातुं राज्यस्य पृथक् रेजिमेण्ट आसीत् इति समयः अस्ति।"

# वैशाखपौर्णिमायाम् आचर्यते बुद्धजन्मोत्सवः बुद्धपूर्णिमा

बुद्धजन्मोत्सवः अथवा बुद्धपौर्णिमा इति बौद्धधर्मीयानां महत्त्वपूर्णं पर्व अथवा उत्सवः अस्ति। इदं पर्व जगति विशेषतः भारते वैशाखपौर्णिमायाम् आचर्यते। अस्मिन् दिने एव गौतमबुद्धस्य जन्म, ज्ञानप्राप्तिः महापरिनिर्वाणं च इति तिस्रः अपि घटनाः जाताः आसन्। स्वस्य मानवतावादिनां विज्ञानवादिनां धम्मसिद्धान्तानां कारणात् तथागतः बुद्धः जगति महापुरुषत्वेन गुरुत्वेन च परिगण्यते। बौद्धधर्मीयानाम् अधिकसङ्ख्यावत्सु चीन-जपान-व्हियेतनाम-थायलंड-भारत-म्यानमार-श्रीलङ्का-सिङ्गापूर-अमेरिका-कम्बोडिया-मलेशिया-नेपाल-इण्डोनेशियादेशेषु तथैव जगति १८० देशेषु बौद्धजनाः इदं पर्व उत्साहेन आचरन्ति। एतेषु बहुषु देशेषु बुद्धजन्मपर्वणः सार्वजनिकः विरामः अपि भवति। भारते अपि बुद्धजन्मपर्वणः निमित्तकः सार्वजनिकः विरामः भवति।

## स्वरूपम्

बुद्धपौर्णिमायां समग्रजगतः बौद्धानुयायिनः बोधगयाम् आगत्य प्रार्थनां कुर्वन्ति। बिहारराज्ये स्थितं बोधगया इति क्षेत्रं बौद्धधर्मानुयायिनां पवित्रं तीर्थक्षेत्रम् अस्ति। गृहत्यागात् परं सिद्धार्थेन सत्यस्य अन्वेषणार्थं सप्तवर्षं यावत् तीव्रा साधना तपः च आचरतम्। ततः बोधगयायां बोधिवृक्षस्य अधः सः बुद्धत्वम् अथवा ज्ञानप्राप्तिम् अलभत। एषा घटना वैशाखपौर्णिमायां जाता। तदाराभ्य एषः दिवसः बुद्धपौर्णिमा इति नामा विख्यातः अस्ति। बुद्धपौर्णिमासमये कुशीनगरे महापरिनिर्वाणविहारे एकमासं यावत् तथागतबुद्धस्य स्मरणं क्रियते। इदं स्थलं यद्यपि गौतमबुद्धेन सम्बद्धम् अस्ति तथापि परिसरे विद्यमानाः अन्ये जनाः अपि अत्र महता प्रमाणेन आगत्य अत्रत्ये बुद्धविहारे श्रद्धया पूजनं कुर्वन्ति। अस्य विहारस्य माहात्म्यं बुद्धस्य महापरिनिर्वाणेन सम्बद्धम् अस्ति। अस्य विहारस्य स्थापत्यं अजिण्ठागुहायाः विहारसदृशम् अस्ति।



अस्मिन् विहारे अन्तिमक्षणे मृत्युशय्यायां स्थितस्य बुद्धस्य ६.१ मीटर् दीर्घा मूर्तिः (भूस्पर्शमुद्रायाः) अस्ति। एषा मूर्तिः रक्तमृत्तिकया निर्मिता अस्ति। यस्मात् स्थलात् मूर्तेः कृते मृदाहरणं कृतं तस्मिन् स्थले एव एषः विहारः निर्मितः अस्ति। विहारस्य पूर्वस्यां दिशि एकः स्तूपः अस्ति। तत्र गौतमबुद्धस्य अन्तिमसंस्कारः जातः। बौद्धजन्मपर्वणि बौद्धानुयायिनः गृहे दीपान् ज्वालयन्ति। पुष्पैः गृहाणि अलङ्कुर्वन्ति। बौद्धपरम्परायाः धार्मिकग्रन्थानां पठनं वाचनं च क्रियते। विहारस्थानां गृहे विद्यमानानां च बौद्धमूर्तीनां पुष्पैः दीपैः च पूजनं क्रियते। बोधिवृक्षः अपि पूज्यते। तस्य शाखाः पताकाभिः अलङ्क्रियन्ते। वृक्षं परितः दिपाः प्रज्वाल्यन्ते। वृक्षस्य मूले दुग्धं सुगन्धि जलं च समर्प्यते। अस्मिन् दिने कृतैः सत्कर्मभिः पुण्यार्जनं भवति इति जनानां श्रद्धा अस्ति। फलकम्:Gapबुद्धपौर्णिमायां देहल्यां सङ्ग्रहालये विद्यमानानि बुद्धस्य अस्थीनि सर्वेषां दर्शनार्थं बहिः स्थाप्यन्ते। तत्रापि आगत्य जनाः प्रार्थनां कुर्वन्ति। अस्मिन् दिने बौद्धधर्मानुयायिनः लुम्बिनी, सारनाथः, गया, कुशीनगरं, दीक्षाभूमिः इत्यादीनि पवित्रबौद्धक्षेत्राणि गत्वा प्रार्थनां पूजां च कुर्वन्ति। बौद्धधर्मसम्बद्धानां सूत्राणां त्रिपिटकानां भागस्य वाचनं पाठनं च क्रियते। व्रतस्य भागरूपेण अस्मिन् दिने उपवासः क्रियते। दानधर्मः क्रियते। अस्मिन् दिने बहुविधाः कार्यक्रमाः आयोज्यन्ते। श्रीलङ्कायाम् अन्येषु आग्नेयदेशेषु अयम् उत्सवः 'वेसक-उत्सवः' इति नाम्ना आचर्यते। वेसक पदं वैशाखपदस्य अपभ्रंशः अस्ति। अस्मिन् दिने बौद्धगृहेषु दीपाः प्रज्वाल्यन्ते पुष्पैः गृहम् अलङ्क्रियते। बौद्धधर्मग्रन्थानाम् अखण्डं वाचनं पठनं च क्रियते। बौद्धविहारेषु (बौद्धमन्दिरेषु) च धूपाः ज्वाल्यन्ते। बुद्धमूर्तयः पुष्पैः फलैः च अलङ्क्रियन्ते दीपैः च पूज्यन्ते। बोधिवृक्षः पूज्यते। तस्य शाखाः पताकाभिः अलङ्क्रियन्ते। वृक्षस्य मूले दुग्धं सुगन्धि जलं च समर्प्यते। वृक्षं परितः दिपाः प्रज्वाल्यन्ते। अस्मिन् दिने मांसाहारः वर्ज्यः भवति। पक्षिणः पञ्जरात् मुक्ताकाशे मोच्यन्ते। दीनानां कृते भोजनं वस्त्राणि च दीयन्ते। बौद्धानुयायिनः तत्रागत्य प्रार्थनां कुर्युः अतः देहल्यां सङ्ग्रहालये विद्यमानानि बुद्धस्य अस्थीनि बहिः स्थाप्यन्ते।

# बॉलीवुडनायकस्य अजय देवगनस्य 'औरों में कहा दम था' इति चलचित्रं जुलाई मासस्य ५-दिनाङ्के प्रदर्शितं भविष्यति।

**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई**

बॉलीवुडनायकस्य अजय देवगनस्य 'मैदान' इति चलचित्रं कतिपयानि सप्ताहाणि पूर्वं प्रदर्शितम् अभवत्। पादकन्दुक-प्रशिक्षकस्य सैयद अब्दुल रहीमस्य जीवनस्य आधारेण निर्मितम् अस्य चलचित्रस्य समीक्षकाणां बहु प्रशंसा अभवत्, परन्तु बॉक्स ऑफिसमध्ये एतत् चलचित्रं सफलं न अभवत्। अजयस्य अस्य चलच्चित्रस्य अक्षयकुमारस्य टाइगर श्रॉफ इत्यस्य च 'बडे मियां छोटे मियां' इति चलचित्रेण सह संघर्षः अभवत्।

अस्य संघर्षस्य कारणेन चलचित्रस्य बहु दुःखं जातम्। परन्तु संघर्षस्य कारणेन हानिः अभवत् अपि अजयः पुनः अन्यैः चलचित्रैः सह संघर्षं कर्तुं गच्छति। 'मैदान' इति चलचित्रस्य अनन्तरम् अजय देवगनस्य 'औरों में कहा दम था' इति चलचित्रम् आगच्छति। अजयस्य 'मैदान' इत्यस्य स्पर्धा केवलं 'बडे मियां छोटे मियां' इत्यनेन सह आसीत्। परन्तु अस्मिन् समये अजयः द्वयोः चलचित्रयोः सह संघर्षं करिष्यति। अजय देवगनस्य 'औरों में कहा दम था' इति चलचित्रं जुलाई मासस्य ५-दिनाङ्के प्रदर्शितं भविष्यति। तस्मिन् एव दिने जाह्नवी कपूरस्य 'उलझ' इति चलचित्रमपि प्रदर्शितं भविष्यति। 'उलझ' इत्यस्य अतिरिक्तं करणजोहरस्य 'किल' इति चलचित्रमपि जुलाई-मासस्य ५-दिनाङ्के प्रदर्शितं भविष्यति।



करणजौहरस्य 'किल' इति चलचित्रे लक्ष्य लालवाणी मुख्यभूमिकायां दृश्यते। लक्ष्यः अस्मिन् चलचित्रेण बॉलीवुडक्षेत्रे पदार्पणं करिष्यति।

'बड़े मियां छोटे मियां' इत्यनेन सह सङ्घर्षं कृत्वा अजयः जुलाईमासस्य ५-दिनाङ्के 'उलझ' इत्यनेन सह 'किल' इत्यनेन सह संघर्षं करिष्यति। अस्मिन् स्पर्धायां कः विजयी भविष्यति तदा एव ज्ञास्यति यदा समयः आगच्छति।

**असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः**

# धारावाहिकं

## गीताप्रश्नोत्तरम् -५५



**अर्जुनः**- अहो, भगवन्! तावकीनाः विभूतयः तु नितरां महत्यः हि वर्तन्ते, अन्यविधाः अपि सन्ति किं ताः?

**श्रीकृष्णः**- कुतः न अर्जुन? किं केवलं विभूतिप्रसङ्गमात्रम् अत्र पार्थ? एतदखिलं जगद्धि मत्स्वरूपं वर्तते इति मया पूर्वं हि त्वत्प्रति उक्तमासीत्। तज्ज्ञापयितुमेव अहं प्राधान्येन, संक्षेपेण च वदन् अस्मि। एवमेव शृणु, महर्षीणां भृगुः अहमेवास्मि, वाणीनाम् एकाक्षरम् अर्थात् प्रणवः अस्मि। सर्वयज्ञानां जपयज्ञं मामेव जानीहि, स्थिरवस्तूनां हिमालयः अस्मि। एवमेव सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां नारदः, गन्धर्वाणां चित्ररथः, सिद्धानां च कपिलमुनिः अहमेवास्मि। तथैव अश्वानाम्, अमृतेन सह समुद्रात् प्रादुर्भूतः उच्चैःश्रवाः, गजेन्द्राणाम् ऐरावतः, मनुष्याणां च राजा अहमेवास्मि इति विद्धि अर्जुन!

**अर्जुनः**- तावकीनाः इतोऽपि विभूतयः सन्ति चेत् कृपया कथय भगवन्!

**श्रीकृष्णः**- आं, शृणु अर्जुन! अस्त्रशस्त्रेषु वज्रं, धेनूनां कामधेनुः, धर्मानुकूलः सन्तत्युत्पादकः कामः, सरिसृपेषु वासुकिः च अहमेवास्मि। एवमेव जलचरनागेषु शेषनागः, जलचरप्राणिनाम् अधिपतिः वरुणः, पितृणाम् अर्यमा, शासकेषु यमराजः च अहमस्मि। तथैव दैत्येषु भक्तः प्रह्लादः, गणकेषु कालः, पशुषु सिंहः, पक्षिणां गरुडः, पवित्रकारकेषु वायुः, शस्त्रधारिणां रामः, जलजन्तूनां मकरः, प्रवहन्तीषु सरित्सु च गङ्गा अहमेवास्मि।

**अर्जुनः**- अहो, केशव! भवान् अन्यत्रापि केषु क्षेत्रेषु वर्तते?

**श्रीकृष्णः**- हे भरत! सर्गाणाम् आदिः, मध्यम, अन्तः च अहमेव अस्मि। विद्यानाम् अध्यात्मविद्या, शास्त्रकर्तॄणां तत्त्वनिर्णायकः वादः, अक्षराणाम् अकारः, समासानां द्वन्द्वः, अक्षयः, कालानामपि महाकालः, सर्वतोमुखः धाता च अहमेवास्मि इत्येवं मां जानीहि भ्रातः! इति। (१०/२५-३३)

(अनुवर्तिष्यते)

# भारतस्य तटवर्ति-सीन्नः सुरक्षायै भारतीय-नौसेनायाः अस्तित्वम् अत्यावश्यकम्- नौसेना प्रमुखः एडमिरल्-दिनेश-कुमार-त्रिपाठी



नौसेना प्रमुखः एडमिरल्-दिनेश-कुमार-त्रिपाठी सबलम् अकथयत् यत् भारतस्य तटवर्ति-सीन्नः सुरक्षायै भारतीय-नौसेनायाः अस्तित्वम् अत्यावश्यकम् अस्ति। नवदिल्ल्यां ह्यः नौसेना-मुख्यालये श्री- त्रिपाठी आत्मनिर्भरतायै नौसेनायाः प्रतिबद्धतां पुनरुच्चारितवान्। श्रीत्रिपाठीवर्यः समुद्रक्षेत्रे समस्या- समाधानाय नवाचार-प्रौद्योगिक्योः स्वीकरणं सबलं प्रत्यपादयत्। तेन नौसेना-मुख्यालयस्य कर्मचारिणां सुरक्षित-वातावरणेन नौसेनया कृतैः प्रत्युत्तर-कार्याचरणैः च परिचयं कारितम्

# उत्तरकाण्डम्! (चतुर्विंशः सर्गः) देवराजस्य इन्द्रस्य मुक्तिः, अहल्यायाः च वृत्तान्तकथनम्

## ।। श्रीरामायणकथा ।।





हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

रावणस्य पुत्रेण महेन्द्रे जिते सर्वे देवाः प्रजापतिं पुरस्कृत्य लङ्काम् अगच्छन्। तत्र पुत्रभ्रातृभिरावृतं रावणम् आसाद्य गगने तिष्ठन् पितामहः अब्रवीत् वत्स रावण! तव पुत्रस्य पराक्रमं दृष्ट्वा अहं सन्तुष्टः अस्मि। त्वया स्वेन तेजसा सर्वं त्रैलोक्यं जितम्। तव प्रतिज्ञा सफला अभवत्। हे राजन्! अयं तव पुत्रः अतिबलः दुर्जयः जगति इन्द्रजित् इति नाम्ना परिख्यातः भविष्यति यं समाश्रित्य त्वया त्रिदशाः सर्वे वशे स्थापिताः। इदानीं सः महेन्द्रः मुच्यताम्। तस्य मोक्षणार्थं त्वं तेभ्यः किम् इच्छसि कथय! ततः समितिञ्जयः मेघनादः अब्रवीत् हे देव! यदि एषः मुच्येत तर्हि अहम् अमरत्वं वृणे! मेघनादस्य तद्वचनं श्रुत्वा महातेजाः प्रजापतिः अब्रवीत् वत्स! अस्मिन् भुवि प्राणिनां महौजसां वा कस्यचिदपि अमरत्वं नास्ति। त्वम् अन्यत् किमपि वृणीष्व। ततः इन्द्रजित् अब्रवीत् हे देव! यदि एवं तर्हि मम इष्टं श्रूयताम्। शत्रुनिर्जयकाङ्क्षी अहं यदा हव्यैः मन्त्रैः पावकं पूजयेयं तदा तस्मात् पावकात् अश्वयुक्तः रथः उत्तिष्ठेत्। तं रथम् आरुह्य यदि अहं युद्धं कुर्यां तर्हि अहम् अमरः भवेयम् इत्येव मम निश्चितः वरः। देवः पितामहः एवमस्तु इति यदा अब्रवीत् तदा इन्द्रजिता मुक्तः देवेन्द्रः देवैः सह सुरलोकं प्रति प्रस्थानम् अकरोत्। एतस्मिन्नन्तरे चिन्तापरीतात्मा देवेन्द्रः ध्यानम् अगच्छत्। महेन्द्रस्य तदाचरणं दृष्ट्वा पितामहः अब्रवीत् हे देवेन्द्र! किमु पुरा त्वं सुदुष्कृतं करोति स्म। पुरा मया अहल्या नाम सुन्दरी स्त्री विनिर्मिता। सा स्त्री मया यदा महर्षिणे गौतमाय प्रदत्ता तदा देवाः सर्वे निराशाः आसन्। तदा कामात्मा त्वं मुनेः आश्रमं गत्वा अग्निशिखामिव दीप्तां तां स्त्रियम् अपश्यः। ततः सा त्वया कामार्तेन धर्षिता अभवत्। तदा त्वां दृष्ट्वा क्रुद्धः महर्षिः गौतमः तुभ्यं शापम् अददात्। सः अब्रवीत् हे देवेन्द्र! त्वं विपर्ययं गमिष्यसि। यस्मात् त्वया मम भार्या धर्षिता अभवत् तस्मात् त्वं समरे शत्रुहस्तं गमिष्यसि। हे महाबाहो! तस्य मुनेः शापोत्सर्गात् हि इदं सर्वम् उपस्थितं यत् त्वया कृतं दुष्कृतम् इदानीं त्वं तत् स्मर। तेन हि त्वं शत्रोः ग्रहणं यातः न तु अन्येन, अतः त्वं सुसमाहितः शीघ्रं वैष्णवं यज्ञं यज। तेन यज्ञेन पावितः त्वं त्रिदिवं यास्यसि। अपि च हे देवेन्द्र! महारणे तव पुत्रः विनष्टः नाभवत्। सः तु आर्यकेण महोदधौ नीतः सन्निहितश्च। पितामहस्य तद् वचनं श्रुत्वा महेन्द्रः वैष्णवं यज्ञं कृत्वा स्वर्गलोकं गत्वा पुनः स्वर्गराज्यं पालयितुम् आरभत। यत्र देवराजः इन्द्रः तेन इन्द्रजिता निर्जितः अभवत् तत्र अन्यस्य प्राणिनः पुनः किम्। एवं महर्षिणा अगस्त्येन कीर्तितम् इन्द्रजितः तद् बलं श्रुत्वा रामः लक्ष्मणः वानराः राक्षसाः च विस्मयम् अगच्छन्। ततः रामः मुनिसत्तमम् अगस्त्यम् अब्रवीत् मे महर्षे! भवता यदुक्तं तत् सर्वं मया विभीषणस्य मुखादपि श्रुतम् अतः एतत् सर्वमपि सत्यम्। ततः मुनिः अगस्त्यः पुनः अब्रवीत् हे राम! एवमेव लोककण्टकः सपुत्रः रावणः समुद्भूतः येन सङ्ग्रामे सुरेश्वरः जितः। -प्रदीपः

sudha_sathaye@yahoo.com

# अष्टावक्रगीता



अष्टावक्रगीता प्रायः ७००० वर्षपूर्वं भगवद्गीतायाः पूर्वमपि कथिता आसीत्। अयं संहिता अष्टावक्रमुनिना जनकमहाराजाय दत्तः प्रवचनः इति प्रसिद्धः अस्ति। अद्यत्वे वयं यत् मनोविज्ञानं वदामः तस्य उत्पत्तिः अस्मिन् एव अस्ति इति वक्तुं शक्यते। मनोविज्ञानस्य अध्ययनं गहनं दार्शनिकं च अस्ति। अत्र कस्यचित् व्यक्तिस्य स्वाभाविकं वा स्वाभाविकं वा गतिं विस्तरेण अध्ययनं करणीयम् इति अपि अपेक्षितम्। यद्यपि विषयः गभीरः अस्ति तथापि अष्टावक्रमुनिस्य कथनं व्याख्यानं च अतीव उत्तमम् अस्ति, कदापि नीरसं न भवति। इयं संहिता देवधर्मस्य विषये किमपि न वदति इति कारणेन किञ्चित् उपेक्षिता एव तिष्ठति।

अत्र भवन्तः वर्तमानजटिलं जीवनं कथं सरलीकर्तुं शक्नुवन्ति इति हृदयस्पर्शी मार्गदर्शिकां प्राप्नुवन्ति। अष्टावक्रगीता ज्ञानयोगस्य सर्वाधिकमहत्त्वपूर्णं ग्रन्थ श्रीरामकृष्णपरमहंसेन श्रीरामनमहर्षिण्यैश्च प्रशंसितः। अष्टावक्र गीता श्री जनकमहाराजस्य सद्गुरु अष्टावक्र मुनेः च संवादः अस्ति, यथा गीतायां श्रीकृष्णस्य अर्जुनस्य च संवादः अस्ति। गीतायां कर्म-ज्ञान-भक्ति-वर्णनं भवति, परन्तु अष्टावक्रगीतायां केवलं ज्ञानयोगस्य वर्णनं भवति।

अष्टावक्रः यदा गर्भे एव आत्मबोधं प्राप्य जनकमहाराजस्य सभायां वक्तुं प्रवृत्तः तदा सर्वे विद्वांसः विस्मिताः अभवन्। यतः अष्टावक्रः केवलं सत्यं वदति स्म। तस्य भाषणम् एतावत् सिद्धं यत् अद्यपर्यन्तं तस्य वचनं कोऽपि छिन्दितुं वा योजयितुं वा न शक्तवान्। जनकमहाराजा अष्टावक्रमुनिस्य श्रेष्ठतां बोधयत्। तं गुरुं मत्वा प्रासादं निमन्त्रयामास। प्रासादः अलङ्कृतः आसीत्। द्वादशवर्षीयः अष्टावक्र मुनिः स्वर्णसिंहासनस्य आदरपूर्वकं उपविष्टः आसीत्। सम्राट् जनकमहाराजा विनयेन पादयोः उपविश्य स्वस्य जिज्ञासां पूरयितुं आरब्धवान्। जनकमहाराजा अष्टावक्रगीता अथवा अष्टावक्रसंहिता जातः। क्रमशः, संगृहीतम्, संकलितम्, अनुदितं च .... सुधा साठ्ये मुंबई।

# आङ्ग्ल, संस्कृत, हिन्दी इति त्रिषु भाषासु 'रीडिंग् चैलेन्जमिशन' इत्यस्य क्रियाकलापस्य आयोजनम्

हिमसंस्कृतवार्ताः: देवेश उपाध्यायः जयपुरम्, 23 मई।

वर्द्धमान श्रीकल्याण इंटरनेशनल विद्यालये रीडिंग चैलेंज मिशन इत्यस्य सफलसमाप्तेः घोषणां कुर्वन्तः वयं प्रसन्नाः स्मः। अस्मिन् आकर्षककार्यक्रमे अस्माकं ९ कक्षायाः छात्राणां सक्रियभागीदारी अभवत्, ये आङ्ग्ल-हिन्दी-संस्कृत-पत्रिकाणां पठनस्य कार्येषु उत्सुकतापूर्वकं भागं गृहीतवन्तः। छात्राणां पठन-अभ्यासं, अवगमन-कौशलं, समग्र-भाषिक-दक्षतां च वर्धयितुं अस्य उपक्रमस्य उद्देश्यम् अस्ति। मिशनस्य कालखण्डे छात्राः एतेषु त्रयेषु भाषासु विविधलेखान् पठितुं, सामग्रीविश्लेषणं कर्तुं, वर्तमानघटनानां चर्चां कर्तुं च प्रोत्साहिताः आसन्। एतेन न केवलं तेषां क्षितिजं विस्तृतं जातम् अपितु बहुभाषिकसाक्षरतायाः गहनतया प्रशंसा अपि पोषिता। अस्माकं छात्राः सम्पूर्णे आव्हाने उल्लेखनीयं उत्साहं समर्पणं च प्रदर्शितवन्तः। ते विचारणीयविमर्शं कुर्वन्ति स्म, अन्वेषणात्मकान् प्रश्नान् पृष्टवन्तः, पठितसामग्रीविषये विविधदृष्टिकोणान् च साझां कुर्वन्ति स्म। एषा उपक्रमः निःसंदेहं तस्य शैक्षणिकविकासे योगदानं दत्तवती, आजीवनं पठनप्रेमञ्च प्रवर्तयति। वयं अस्माकं छात्राणां उपलब्धिषु गर्विताः स्मः, भविष्ये अपि एतादृशेषु समृद्धिकरणकार्यक्रमेषु भागं ग्रहीतुं प्रतीक्षामहे। कार्यक्रमस्य निरीक्षणं विद्यालयस्य




प्रधानाध्यापिका आराधना पारीक, रेणुका जोशी, राखी गर्ग च कृतवन्तः।कार्यक्रमस्य संयोजकः देवेश उपाध्याय आसीत्

# देहल्यां लोकसभायाः सर्वेषु सप्तनिर्वाचनासनेषु विजयम् अधिगमिष्यते - हरदीपसिंहपुरी



भाजपा-दलस्य वरिष्ठनेता केन्द्रियमन्त्री च हरदीपसिंहपुरी अद्य प्रोक्तवान् यत् तस्य दलं दिल्ल्यां लोकसभायाः सर्वेषु सप्तनिर्वाचनासनेषु विजयम् अधिगमिष्यति। नवदिल्ल्यां सम्वाददातृभिः सह जाते सम्वादे सः प्रोक्तवान् यत् भाजपा-दलेन राजधान्यां विगतेषु दश-वर्षेषु चतुर्पञ्चाशत्-सहस्र-कोटि-रूप्यकाणां विकास कार्याणि कृतानि सन्ति। आम आदमी पार्टीति दलस्य कार्यशैलीं विरुध्य अकथयन् श्रीपुरी प्रोक्तवान् यत् अनेन दलेन दिल्ल्याम् आयुष्मान-भारतयोजना-प्रधानमन्त्रीआवासयोजना इति द्वयोः क्रियान्वयनं न कृतम् अपरत्र दिल्ल्याः मुख्यमन्त्रिणा स्वस्मै विलास-वैभव-सम्पन्नं भवनं निर्मितम्।